SAMSKRITA-DUTA-KAVYA SAMGRAHA

Work No. 5

PRACYAVANI
SAMSKRITA TEXT SERIES

Vol. XI

THE PANTHA-DUTA-KAVYA

By

BHOLANATH

OF TIKURI, BENGAL,

Critically edited for the first time with an Introduction in English

by

Dr. JATINDRA BIMAL CHAUDHURI

Secretary, Govt. Vangiya Samskrit Siksa Parisat
and Jt. Secretary, Pracyavani;
formerly Head of the Department of Sanskrit,
Presidency College and Principal,
Sanskrit College, Calcutta.

CALCUTTA, 1949.

Re .1/-

Published by :

DR. JATINDRA BIMAL CHAUDHURI

Jt. Secretary, Pracyavani,

3, Federation Street, P.O. Amherst Street,

Calcutta—9.

Available at :

ORIENTAL BOOK AGENCY

15, Shukrawar Peth, Poona.

CHUCKERBUTTY, CHATTERJEE & CO.

15, Bankim Chandra Chatterjee Street,

Calcutta.

DAS GUPTA & CO.

54/3, College Street, Calcutta.

SAMSKRIT PUSTAK BHANDAR

38/1, Cornwallis Street, Calcutta.

PRACYAVANI, New Delhi

7, Panchquin Road, New Delhi.

PRACYAVANI, Banaras

64, Khalispura, Banaras City

And

PRACYAVANI

3, Federation Street, P.O. Amherst Street,

Calcutta—9.

Introduction

We have edited in our Samskrita Duta Kavya Samgraha Series four Duta Kavyas viz., (1) the Bhramara-duta-kavya by Rudra Nyayapancanan Bhattacarya, eldest brother of the celebrated Naiyayika Visvanatha Tarkapancanan of Bengal; (2) the Van-mandana-guna-duta-kavya of Viresvara; (3) the Candra-duta-kavya of Jambu Kavi, a Jaina Poet, and (4) the Hamsa-duta-kavya of Vamana Bhatta Bana of the South. We have also published in the Pracyavani, vol. II, Nos. 3-4, 1945, pp. 118-120 a Pika-Duta or Cuckoo-Messenger by Rudra Nath (Nyaya ?) Panca-nana Bhattacarya as edited by Sri Ananta Lal Thakur, M.A., one of the then Research Scholars of the Pracyavani. Here we publish a new Duta-kavya , viz. the Pantha-duta of Bholanath of Tikuri, Bengal, who was a devotee of Ramcandra and probably an adherent of the Vaisnava Faith, and describes in this Kavya the pangs of separation suffered by Sri Radha and other Gopis during the absence of Sri Krisna from Vrindavan.

The message is sent here by the Gopis through a travaller from Vrindavan to Sri Krisna in Muthra. The Duta Kavyas are usually divided into two parts and in the first part, the route is described. But here the traditional procedure has not been followed : the poem does not contain any description of the route at all.

The traveller has been depicted as wearing a Tulsi garland on his neck and must, therefore, be a devotee of Sri Krisna. He has been entreated not to hurry too much for rendering service to the sender of the message (here the Bengali poet has used the popular swearing in Bengal—na hay, amar matha khao—na cen man-mastakam khadasi, verse 11).

In her message one Gopi censures Sri Krisna for having forgotten all the Vraja Gopis. It does not befit him, she says, to deceive them, howsoever pleasant the company of the cultured ladies of Muthra be. Katyayani or Durga still bears witness to all the sufferings undergone by the Vraja-Gopis for him (v. 18). Probably, Krisna is not an adept in love in which case he had better learn all about it from Ardha-Narisvara or Siva, who assumes the form as such of half-Man—half-Woman (v. 22).

When this Gopi falls into a swoon in course of her lamentations (v. 31), another Gopi goes on accusing Sri Krisna for his company with Kubja in Muthra : Sri Krisna himself is *Tri-vakra* and Kubja, too, is so ; hence the union between the two is laudable indeed (v. 33). But how can Kubja be compared with Sri Radha whose single toe has hardly any comparison in the whole world (v. 35). The Cow-herdess further derides Sri Krisna for his being a cow-herd, for she cannot understand how the Protector of the whole universe could be a cow-herd ; further, Krisna is no better than a thief but it is Mother Yasoda who has endowed him with Divinity in spite of his being a thief (v. 40). Old and decrepit Ugrasena has been enthroned Ruler of Muthra by Krisna in order that he may enjoy the company of its beautiful damsels. In fine, she says, it is really very strange that while all others are extremely worried for Sri Radha, Krisna has now grown absolutely indifferent to her.

The traveller is further entreated to report to Krisna that the only way left to her now is to drown herself in the confluence of the Ganges and the sea (v. 94). The Gopi, however, reaffirms that, either for love or hatred of Sri Krisna that may be in store for her, Gopala, the son of Nanda, is her only resort and it is only He whom she loves and she also prays that she may continue to do so from life to life (v. 102).

The present poem is edited from a single MS. (No. 3890) belonging to the India Office Library, London. This is the only extant MS. of the work. Thanks are due to the authorities of the Library for lending this unique MS. to us. As the Text will show the MS. is quite corrupt. Many lines cannot be deciphered at all and there are many careless mistakes of the scribe here and there.

Bholanatha of Tikuri composed the *Sandarbhamritatosini Tika* on the Mugdhabodha, a MS. of which is preserved in the India Office Library, London (No. 871).

The author deserves praise for simplicity of style and his religious fervour. He has cleverly manipulated the theme. He has aptly used several Bengali idioms in their Sanskrit garb which are quite enjoyable.

The poem is complete in 105 verses of which only two viz. 102 & 103 are composed in the Vasantatilaka metre whereas the rest are in Sardula-vikridita.

श्रीराधाकृष्णाभ्यां नमः।

गौड़-टिकुरी-निवासि-भोलानाथ-कृतं

पान्थदूतं काव्यम्

डक्टर श्रीयतीन्द्रविमलचतुर्धुरीणेन संस्कृतम्

भक्तोद्धारणकारणादवतरिष्यन्त्या स्वशापच्छलात्
स्वच्छन्दं सवयस्यया सकृपया गोलोकतो गोकुले।
ह्लादिन्या परकीययेव सहितो हृष्टोऽवतारोह यः
श्रीकृष्णोऽवततार वः स रसिकः स्वान्तं समुल्लासयेत् ॥१॥

भूमौ दैत्यभुवां भवं प्रभजतां[1] भूभारभूमीभुजां
निर्भाराय भुवो भवाम्बुधिभियामाभीरवामभ्रुवाम्।
सौभाग्याय च शम्भुवारि[2] भवभूभाव्योऽभवोऽप्युद्भवं
यो लेभे भवतां भवोद्भवभयाभावे स भूयाद्भृशम् ॥२॥

काचित् क्वापि दिने दिवाकरसुताकूले सखीभिः समं
प्रत्यूषे विरहग्रहग्रहणतो वैराग्यमासाद्य सा।
कृष्णं तज्जलनीलपेशलतनुं स्मृत्वाऽपतन्मूर्च्छिता
दूतीदत्तजलैर्विबुध्य मथुरापान्थं कमूचे वचः ॥३॥

साधो स्वागतमास्यतामिह महातीर्थे कलिन्दात्मजा-
तीरे नीरजनिःसरन्मृदुमरुत्सञ्चारतश्चारुणि।
दुग्धारानिधनाय साधु विधिना गोधुग्वधूनां पुन-
स्त्वत्सङ्गो विहितो हि साधुमिलनं सन्तापसन्तापनम् ॥४॥

गन्तव्यं तव भव्य किं मधुपुरीत्याकर्ण्य कर्णप्रियं
भद्रं भद्रमनूद्य साह भवता कार्योद्यमो मामकः।
कर्तव्यो भवितव्य[3] मेव भविता सम्पादिते प्रोच्यते
कार्ये[4] सिद्धिरपि प्रभुस्तव गुणाय स्यान्ममापि ध्रुवम् ॥५॥

---

1. MS. जता। 2. MS. शन्तरारि। 3. MS. भवतिव्य। 4. MS. कार्थ।

कायोऽपाययुतोऽनपाययशसे यो यस्य न स्यात् स किं
साधोरेष परं परोपकृतये ह्येवं विशिष्योज्जगुः।
तत्रापि स्वविधिं विधातुमपि चेत् स्यादानुषङ्गं फलं
स्यान्नु स्याद्भवतो यशो व्रजवधूप्राणप्रदानात्मकम् ॥६॥
किं रूपं तव मादृशोऽपरिचिता अप्येतदानन्दय-
त्येवं वच्म्यमृषा करोमि न नुतिं कार्यञ्च तन्मादृशाम्।
सिद्धिं यास्यति संविशञ्जन इव प्रासाद[1]मारोहति
स्वान्तं नः परितः प्रसादमतुलं पृच्छेदमेताः सखीः ॥७॥
सूर्यस्येव निरस्तदुःखतमसः प्राप्तोदयस्याद्य ते
रागं प्रापितया गवा मधुरया सद्यः परामर्षणात्।
पद्मानीव मुखानि नस्तदधिकं पान्थ स्फुटानि स्फुटं
पश्चारादपि सन्निधावुपकृतिर्मा स्म हि भिन्नेयति ॥८॥
रूपं चन्द्रति मानसं द्रवति ते शीलं सुविश्वस्तति
प्रीतिः पर्वतति प्रतीतमहिमा स्रोतस्वतीपालति।
त्रैलोक्यैकवलच्चवस्त्वति यशः पीयूषति व्याहृतं
यो योऽयं स गुणः सुहेम-गुणवत्कार्येऽत्र वर्द्धिष्यते ॥९॥
पान्थ प्राज्ञ गलप्रलम्बतुलसीमालोऽसि शिष्टोऽसि भोः
सच्छीलोऽसि परार्थपूरणरसैः पूर्णोऽसि दक्षोऽसि तत्।
धृत्वा पादयुगं वदामि विषये गुह्येऽत्र दूतो मतः
शीघ्रं साधय कर्म तत् पथि शिवं भूयात् पुरीं यास्यतः ॥१०॥
स्मारं स्मारमिदं वचः पथि पथि प्लक्षादिमूले वसन्
दर्शं दर्शमकण्टकं स्थलमतिव्रीत्यं मदर्थं त्यजन्।
पायं पायमपः प्रया[2]स्यसि न चेन्मन्मस्तकं खादसि
प्रोक्तस्ते हृदये ह्यसह्यमखिलं कार्यस्य नः का कथा ॥११॥
यो भूपोपरि बोभवीति भुवमु[3]ल्लालसीत्यद्वयं- (?)
स्तत्साधूक्तमसाधु किं परिमृषन् वावग्धि तस्मै तथा।
नो रोरोष्टि न जाससीति स यथा बोबोद्धि शोश्चोत्यथो
नानन्दीति दरीधरीति च वचश्चर्कर्त्ति चेन्मत्प्रियम् ॥१२॥

1. MS. सादा। 2. MS. प्राय। 3. MS. छु।

आसां कोकमृगीदृशां पतियुषां शोकापनोदं दिशन्
सूर्योऽयं समुदेति पश्य पथिक प्रायोपकारात्मकः ।
त्वं प्रेयोविरहेण तप्तमनसामस्माकमेतादृशः
किं न स्या हरिदास एव करुणादृष्ट्यो हि विश्वप्रियः ॥१३॥

प्रेमैवं विरचय्य वल्लववधूः साधुस्वभावा हरे
धच्चय[1]न्नो विरहानलं तनु-नलं श्वासाश्वासवाक्यानिलम् ।
प्रज्वाल्य त्वमितो गतोऽसि सुखितोऽभूर्नागरीनागरो
यद्यन्नासत्रमिदं तदेवमकरिष्यं नेति स प्रोच्यताम् ॥१४॥

शैवालं नलिनीदलं मलयजं जम्बालकं शीतलं
नूनं पल्लवमत्र नो जनपदे दौर्लभ्यमेतानि यत् ।
अद्यामानि पुरातनप्रणयतः संप्रार्थयामो वयं
शीघ्रं प्रेषयिता मदर्थमिति तं साधो बुधं बोधय ॥१५॥

दूरे नः स्मृतिरस्तु दृश्यसि ययोस्तारोपमः किं तयोः
पित्रोर्न स्मरसि स्मरस्य वशगो भुत्वाऽथ रात्रिन्दिवम् ।
ता योषाः उपसेवसे वत मृषा भाषाश्च तासां रसा-
ज्ञा[2]नीषे रसिकोऽसि संप्रति रसालापेषु विख्यायसे ॥१६॥

गेहं नेह समीहसे न वहसे कोशं च पित्रोः कृशे
काये शाव इवासवः कथमहो ते शेरते साम्प्रतम्[3] ?
तौ जिज्ञासुरिमौ न पश्यसि पुरीनारीमनोज्ञापरः
कश्चित्तिष्ठतु यातु वा यमदृहं तस्मै न हि प्रार्थये ॥१७॥

रासे रुद्रविनिर्गमा निरुपमास्तास्तापशेषा मृताः
प्रेमायं मरणाय नो यदि पुरा ज्ञातः कथं स्वीकृतः ।
यच्छिन्नं[4] कुलशीलशृङ्खलमलं यद्यत्त्वदर्थं कृतं
तस्मिन् कर्मणि मर्मकर्त्तिनि पुनः कात्यायनी साक्षिणी ॥१८॥

योषाणां व्रजवासिनां समशने यत्पूतनाप्राणत-
स्त्वं प्राणाहुतिकल्पनं प्रथमतः पीत्वापि तस्याः स्तनम् ।
प्राकार्षीरिति तत्क्षणात् सुविदितं किन्तु त्वया मोहितैः
प्राणानां परिपन्थिता तव तदा मातृगजनैर्विस्मृता ॥१९॥

---

1. MS. धच्च । 2. MS. ज्ञा । 3. MS. माष तम् । 4. MS. च्छिन्न ।

यन्निन्दाच्चणमिव या ननु तनुत्यागेन कात्यायनी
सौभाग्यादिह सम्भवेऽपि विदधे तच्चार्द्धनारीश्वरम् ।
शीघ्रं देहजिहासया च भवतो मानाशया पूजिता
हाहा सैकतरन्तु भूधरसुता नादादिदं गद्यताम् ॥२०॥
जिह्मप्रेमवती समर्प्य भवति कायं स्वयं श्रीपति
भिन्नस्वं वत मृत्यवे हि सरलास्त्वत्कं नवा शक्नुमः ।
किञ्चेमं प्रतिपालयाम न वयं विक्रीतधेनूपमं
धर्म्मात्माध्वग धर्म्मपालकतमं त्वं धर्म्मतो बोधयेः ॥२१॥
ता योषा वयमाच्चिपाम न परं सीमन्तिनीगौरवं
नत्वं वेत्सि तवास्ति चेद्दिविदिषा तच्चार्द्धनारीश्वरम् ।
गङ्गाधारिणमित्य विद्धि नगरीनारीमनोज्ञ त्वया
शुद्धा धूर्त्त वयं परं परिचिता नानञ्चिता वञ्चिताः ॥२२॥
स्थानं काननमिव गोपवनिता न स्मो विदग्धा वयं
दध्नां विक्रयिणी तथैव जननी नन्दोऽपि गोचारकः
बाला बालधियः च्चयस्तु णमयः सम्पत्तयो गोचयः
कस्त्वां स्मारयितुं च्चमोऽत्र सुतरां दोषो न ते बुध्यते ॥२३॥
माने नो महिमा गतिषु लघिमा तारासु संनीलिमा
विज्ञाने गरिमा यशःसु सितिमा[1] मध्येऽणिमा ये त्विमे ।
सर्वे[2] संप्रति ते क्रमादधिगता दुःखं सुखं तन्मुखं
पौरस्त्री-पटलं कपोलफलकं सर्वाङ्गमिवं वदेः ॥२४॥
पूर्वं यन्नवता वनेऽपि वनिताशंसी स्व[3]वंशीस्वन-
स्वक्रे चक्रपते तदा निजपतेः पीडाः स्वपित्रोस्त्रपाः ।
त्वासां लोककलङ्किता नृपभयं तच्चापदाच्चापद-
सुच्चीकृत्य सकाशमेमि भवता दत्तं [4]पुनस्तत्फलम् ॥२५॥
कं मन्त्रं श्रवणे निधाय हृदयं याऽचूचुरल्लीलया
पश्चादेवममूसुहृत् कुलवतीरस्मानकस्मात् सतीः ।
त्वत्सङ्गं विपिनेऽप्यचीकरदिदं नाजिज्ञपत् सैव ता
वंशीगीतिरपाकृतीः कृतवती दूतीव ते दुष्कृते ॥२६॥

---

1. MS. शिति । 2. MS. सर्वे । 3. MS. म । 4. MS. भवद्दत्तं ।

एकस्यां दृशि कज्जलं करपदोः कार्ये च सव्यत्ययं
भूषावस्त्रमजीग्रह[द्]द्धृतधियः[1] पूर्वं किमस्मान्न सा ।
नो चेत्काऽवरपामरी क्षितितले स्वाच्छादनं भूषणं
स्वं कायं च न वेद सत्कुलभुवां लज्जायुषां का कथा ॥२७॥
त्वं राका-द्विजराज-दर्शिततनुर्मत्प्रीतये प्रीतिमाँ-
स्तं तं वेशविपर्ययं प्रकथयन् वक्त्रं करेणोद्धरन् ।
सङ्केतेन विनापि ते वपुरलं भाति प्रिये हे प्रिये-
त्यस्तावीः किल तां स्मृतिं परिहृतां वंश्या पुनः प्रापयन् ॥२८॥
स्यात् प्रेमेदमकृत्रिमं[2] तदुभयोः सान्निध्यमास्तां सदा
यावज्जीवमिदं वदन्तु वचनं प्रत्यर्थिनो मे[3] मुदा ।
अद्य स्यात् समयः परस्परपरप्रेमार्द्रयोरावयो-
स्त्वं मेऽहं तव चेति निश्चितमिदं यत्तत् त्वया विस्मृतम् ॥२९॥
ताः सर्वाः स्मर शर्वरीः क्षणनिभा नीतास्त्वया त्वां विना
दण्डार्धं कतिकोटि ोटियुगवज्जातं क्व वा सागसाम् ।
नास्माकं हृदि तापशान्तिलवकृत्पाटीरपाथोरयः
सन्तप्तायसपिण्डकोपरि यतः कीलाललेशोपमः ॥३०॥
भ्रातः कोऽसि पुराध्वगोऽस्मि विदितं क्व प्रस्थितस्त्वं पुरं
किं कार्यं तव दौत्यकर्म नु कथं नन्दात्मजार्थं स कः ।
क्वास्ते ते दयितः पुरे पुरमतो नेतुं तमेतन्तु कः
शक्तो नीत उमेति केन च कथं किं किं ब्रुवाणाऽपतत् ॥३१॥
एतां वाष्पजड़ीकृतां सहचरीं बुद्ध्वा चलोष्ठाधरा
प्रोचेऽध्वन्यजनाग्रगण्यमतुलामर्षस्फुरच्चक्षुषा ।
श्यामं कामवशं वस[4]न्तमनिशं भूभृत्सुताभिः समं
कुब्जासङ्गरतं मतं मतिमतां ब्रूया विदग्धोत्तमम् ॥३२॥
सा कुब्जा परमा तवैव सविधे ख्याता त्रिवक्राभिधा
विख्यातस्त्वमपि त्रिवक्र इति संसक्तोऽसि यस्यां सदा ।
इत्थं योग्यसमागमो विधिकृतः स्यादेव किन्तूत्तमा
राधायास्तुलनाविधौ जलनिधेः कन्या न धन्यायते ॥३३॥

---

1. MS हृदितयः । 2. MS. क्रिमं । 3. MS. ये । 4. शन्त ।

भ्रातर्भ्रान्तमिति प्रशाधि रसिका रासे च रासेश्वरी
दृष्टा यत् पदपद्मदास्यनिपुणा नान्या हि[1] मन्यामहे ।
तामेकां विकलां विलोक्य विकलो मा भूः कथाकौशला-
देतस्यास्त्वरितं मनोभिलषितं त्वं सादरं पूरय ॥२४॥
आस्तां सर्वशरीरकान्तितुलना यत् पादपद्माङ्गुली
लेशस्यापि जगत्त्रयेऽस्ति न तुलेति स्यादृतं किन्तु यत् ।
एता राधिकया समाः स्विदिति चेन्न स्यात् कथं राधिका-
प्रेयान् प्रीत इहेति कोऽपि मनुते तन्मृत्युमाप्ता वयम् ॥२५॥
वाग्मिस्निग्ध इतो भवान् यदि पुरीमान्यस्तथापि स्वयं
मानं मा कुरु यत्त्रिलोकरमणीमौलिस्थया राधया ।
कायो द्रोहनिकायते मरकतप्रायोऽपि न स्तूयते
यस्मिन्नास्ति परोपकार इषितः कैर्वा स किं शोभते ॥२६॥
कामा[2]पङ्क्तु ति यद्वचः श्रुतिपुटे पीयूषवन्निष्टितं
यन्नृत्यागतिपद्धतौ कितव केनापि च्छलेन स्थितम् ।
यन्नेत्रान्तनिरीक्षणार्पितपरानन्देन तस्मिन् क्षणे
विश्वं विस्मृतमद्य सापि भवता कालेन हा विस्मृता ॥२७॥
क्रीतोऽहं विधिकृत्तवैव विदितो लोके सदा त्वद्वशो
राधे शाधि सुधा नवाधिजलधौ मा धेहि मां दुर्धियम् ।
कारुण्यं कुरु किञ्च यत् क्षितिसमा क्षान्तेति सत्यं भवे-
देवं दन्तविकाशनं बहुविधं कातर्यमाविष्कृतम् ॥२८॥
गानेनानुगमेन तेन मधुरालापेन दृग्भङ्गिना
स्वालोकेन मनोहरेण हसितेनाराधि का वाधिया ।
यत् साध्वीसमयं निरस्य च तया स्वाराधितोऽप्येष्टया
पौरः सन्न कृतोपकारमनुसंधत्ते भवान् स्त्रीवधी ॥२९॥
नादत्ते स्वयमीश्वरः किमपि तन्नृ ह्लाति भाग्योदया-
द्भक्त्या यत् प्रतिपादितं त्रिज[ग]तां पालो न गोपालकः ।
भक्ताभीष्टमपि प्रभुः प्रकुरुते न क्वापि चौर्यादिकं
चौरस्यात्र यशोदया तव पुनर्देवलमाख्यापितम् ॥४०॥

---

1. MS. नि । 2 MS. काया ।

यत् संगोपयितुं शरीरमनिशं कारीशराशिं स्वयं
सन्धत्से स्म मदीश्वरीचरणरसाकृष्टोऽसि दृष्टो मया।
पाकाय व्ययिते तु तत्र विधुरोऽप्यालोकितः कैर्न वा
सा सा पूर्व्वदशाद्य नास्ति स पुनस्त्वं नासि नन्दात्मजः ॥४१॥

पुष्टो यत्पयसाद्य सापि कुपिता मा[ता]पिता गोपको
यः शैलो हरिदास एष च शिला जन्मावनी सा वनी।
राधाराधितपादपङ्कजयुगा योग्या न भुक्ताननो-
च्छिष्टोऽयं न समः सखेति कुमते गर्वं वृथा मा कृथाः ॥४२॥

कंसं ध्वंसपथं नयन् गतभयो राज्ये च राजा भव-
न्नाज्ञाकारिणमातुरं प्रवयसं नाम्नोग्रसेनं नृपम्।
कुर्वन्नङ्कुशशून्य संप्रति सुखी ध्यायन्नपुण्यानि ता
नारीरेवमरीरमोऽनवरतं दण्ड्योऽसि कैर्दण्डसे ॥४३॥

प्रातः प्रातरियं पुरीपथमनु त्वद्दर्शनाकांक्षिणी
प्रेयानेति न वेति पश्यत जलव्याप्तं मदक्षिद्वयम्।
द्रष्टुं न क्षममब्रवीदिति ततो नीताऽनुसायं व्रजं
याऽस्रन् मुञ्चति ते कृते कितव सा दृष्टा न दुष्टात्मना ॥४४॥

अश्रान्तस्रवदश्रवो वत गतप्राणीयमित्याकुला
जम्बालैः किल संकुलं क्षितितलं कुर्वन्ति के नानिशम्।
श्रीराधापदधूलिशालिवपुषो दुर्वारहाहारवाः
के वा नेह लुठन्ति चेति सदय त्वं तं शठं श्रावयेः ॥४५॥

द्रागाकर्ण्य चतुर्दिशं प्ररुदतां रावं तिरश्चामपि
क्षीणप्राणमरुत्परीक्षणकृते प्रेष्यादिकर्म्मापि तत्।
प्रेक्ष्योद्भूतकृपावशादिव तया व्यामुग्धया मूर्च्छया
त्यक्ता यष्टिमिवावलम्ब्य मुरभिद्वार्त्तां पुनः सोत्थिता ॥४६॥

त्यक्ता यद्भवता विभाव्य भविकं सम्भावयामो वयं
चित्तोत्तापममुं नवा मनुमहे पौराङ्गनादूषणम्।
काठिन्यं कलयामहे कठिन यत्सङ्गाच्च गंगाम्भसो
लेशस्यापि हि पापपर्वतपवेस्त्वत्संग दृष्टो न नः ॥४७॥

यावन्नः सविधाद्व्यधायि भवता पौरी शुभप्रस्थिति-
स्तावच्चारुविवेचकेन्द्रियचयो निश्चेष्ट एव स्थितः ।
किन्त्वेकं वत मानसं कृतमृदुस्मेरं स्मरत्त्वन्मुखं
कष्टेनेदमहोऽधुनापि वसति प्रस्थासरर्तेऽतः परम् ॥४८॥

अस्माकं परिपन्थिनी वत भवद्बोधैकविध्वंसिनी
यासीत् सम्प्रति निर्दयव्यवसिता साध्वी सुषुप्तिः सखी ।
सा सख्येन समाहृतापि कदने किंवा त्वया शिक्षिता
तद्यानक्षणतः क्व सा गतवती घोषे न कैर्ज्ञायते ॥४९॥

त्वं दुर्गासि दयायुतासि जगतां पूज्यासि विश्वप्रसू-
रप्येवं विदितासि मद्विधजनांस्त्यक्तुं ततो नार्हसि ।
निद्रेऽस्मानभिभूय भूयसि सुखे धेहीति संप्रार्थिता
यद्येवं बहुशः स्तुता न मिलिता ज्ञातेति रुष्टा गता ॥५०॥

दुष्टाभौ मधुकैटभौ परिमृषन्नाभौ वसन् साध्वसा-
न्निर्बोधीकृतविष्णुबोधनकृते वेधा व्यधात् त्वत्स्तवम् ।
निद्रे त्वं जगदीश्वरीति कुरु शं सन्तुष्टयाऽथानया
त्यक्तास्तावसुरावहन् स हरिरित्येवं न जा[ना]ति कः ॥५१॥

या जन्मावधिसंगिनी किल जगत्सर्वाधिविध्वंसिनी
त्वत्संगप्रतिभंगसाध्वसवशान्निद्रापि सा नाहृता ।
मूर्खोदर्कविशुद्धकर्मणि यतो नैवास्मि सत्सेविनो
को नाप्नोति कुसंगमादिह परीणामे विरुद्धं फलम् ॥५२॥

शिष्टो दुष्ट इवाटवीव सदनं वाटीव मुञ्जाटवी
हारो भार इव प्रसूनरचिता मालापि जालोपमा ।
व्याघ्राद्याः परिवारवत् परिजना व्याघ्रादिहिंस्रोपमा-
स्त्वत्संगे विहिते पुरा मम न किं किं वै परीत्यं गतम् ॥५३॥

नोदर्कं परिचिन्त्य वित्तनिलयापत्याप्तपत्यादिकं
त्यक्त्वा विष्णुपदाप्तिमात्रमनसामस्माकमाकस्मिकम् ।
विश्वं विष्णुपदं प्रकाशितमतः साधोऽधुना साधुना
तेनैतज्जनितन्तु किन्तु न भवेदर्थाय शब्दाय तत् ॥५४॥

पूर्वं त्वन्मिषसूक्तिसंस्तुतिकृते सर्वेन्द्रियाणां मया
कर्णत्वं परिकांचितं किमिति यद्राजीवनाभाजभूः ।
त्वत्पुत्रोऽपरकर्णतां प्रविदधे तानीन्द्रियाण्यद्य मे
भिन्नेभ्यो व्यजनस्वकीयविषयानीतानि दातॄणि यत् ॥५५॥

भाव्यो नायमसम्भवो यदधुना नान्यो दृशा दृश्यते
नीलालोकभिया परः कटुतया घ्राणेन कर्णेन वा ।
शीतो वायुरपि त्वचा रसनया नेवं सुधा गृह्यते
शैथिल्यं क[1]लिताः क्रियाः स्वविरहात् कर्मेन्द्रियाणामपि ॥५६॥

अद्योदग्रपदस्य ते सुमिलितं दौःशील्य-दौवारिकं
नालोक्यैव भवन्तमाशु मम हृद्भूतं गतं चेत्त्वया ।
रुद्धन्त भवतु व्रजे च न शिवस्यावोध स्यात् पुन-(?)
र्दण्ड्यादण्ड्यविवेकिता बत हता दूतस्य रोषाद् ध्रुवम् ॥५७॥

उल्लङ्घ्यापि वचो मयैव गमितं चित्तं पुनर्नागतं
तत्साहित्यमृते मदिन्द्रियचयः स्वस्वक्रियास्वक्षमः ।
स्यादेवं यदि मे प्रसङ्गवशतः संज्ञा कदाचिद्भवेत्
पौरीणान्तु मदान्धतादिवचनैर्हास्यन्त्व[2]सह्यं महत् ॥५८॥

चित्तं सुस्थयितुं त्वदर्थरचितारासि यदा स्थीयते
हाहा हन्त तदा मदीयनयनद्रोणीस्रवद्वारिभिः ।
यद्यापूरितमालवालपटलं निष्कर्मणाच्चाद्य न-
स्तत् किं साहित किं न सेचनमिदं कर्म स्वयं सिद्ध्यति ॥५९॥

प्रत्यध्वं प्रतिकाननं प्रतिपदं पत्[3]पङ्कजं पङ्कजं
जातं धूलिचये विचित्रमभवत् पश्यत्सु लब्धादरम् ।
अस्माकं तदवेक्षणापि तद्दशामद्यास्रुपातः पुन-
स्तं पङ्कं जनयंश्च तत्तदकरोत् स्वाभाविकं पङ्कजम् ॥६०॥

नाथ त्वद्विरहाम्बुधौ निरवधौ त्वद्भावनासेवधौ
पूर्णेऽक्षिस्रवदस्रनिर्भरजलेराशापगासङ्गमे ।
भावित्वन्मिलनप्लवा अपि धृतप्राणाः कथञ्चिद्वयं
[वार्ता] प्रेषणतत्परेण भवता किं सप्लवाः प्लाविताः ॥६१॥

---

1. MS. च। 2. MS. स्व। 3. MS यत्।

प्राण प्राणनृपः प्रयाणसदृशं हाहारवं दुन्दुभिं
स्थायं स्थायमभीक वादयति नो देहादिदानीं यदि ।
स्वीयानिन्द्रियसैनिकान् प्रगमयन् यास्यत्यसौ सत्वरो
गोपीप्राणपतित्वमात्मनि तदा केन त्वया साध्यताम् ॥६२॥

मद्देहे विरहानलोज्ज्वलशिखागेहेऽपि मज्जीवनं
चीणं सन्निहिताश्रयं हतरयं तत्रापि दग्धं न तत् ।
....
.... ॥६३॥

बालौचित्यविधिर्विधिर्यदवधि त्वं लोकलच्मीनिधिं
त्वां दूरावसथं विधाय तरलप्रेमंस्तमाधिं व्यधात्[1] ।
....
.... ॥६४॥

प्रस्थाने प्रतिबिम्बवन्न भवतो[2] मज्जीवितं प्रस्थितं
तेनारातिनितम्बिनीभिरधुना यद्‌ गीयते गीयताम् ।
त्वं प्राणेन[3] समोऽथवा तदधिकः स्याः किन्तु यज्जीवितं
त्वत्तो भिन्नमितीरितन्त्वविरतं सन्तापयत्येव माम् ॥६५॥

गोपीसंघसमर्दनोऽपि नगरीनारीप्रियोऽपि प्रभो
गोपीनाथ इतीरणेन न भवानद्यापि दोदुष्यति ।
अस्माभिर्यद[4]भीतिभिर्विचलिताचारादिभिर्नाद्यते
तज्जानन्ति जना जनार्दन पुनस्तन्नाम किन्नार्थवत् ॥६६॥

पौनःपुन्यभवन्निरीच्चणकृते गोपेन्द्रपल्लीपुरः
प्रोक्तं यन्नवनीतचौर्यघटितं वाक्यं त्वदीयं मया ।
....
.... ॥६७॥

यो[5] धेनूरनुरेणु कर्षिततनूर्वेणुस्वनैर्नर्तयन्
स्वं धाम प्रविशन् सखीन् सहसयन् गोपीश्चवांस्युन्नयन् ।
अध्वन्यध्वनि माद्दशाञ्च नयनानीन्दीवराणीव यत्
सायं प्रस्फुटयंश्च[6] वेद स भवान् कस्या न कां कां दशाम् ॥६८॥

---

1. MS. यत् । 2. MS. न्नभवता । 3. MS. प्राण । 4. MS. यंद ।
5. MS. चे । 6. MS. याश्च ।

साक्षान्मन्मथमन्मथस्य विजितत्वे लोकयल्लोकच्छवे-
रीषद्धासविलासचाक्षुषलसल्लास्यस्य हे लम्पट ।
कल्पं(?) प्रेक्ष्य वताय हन्त पुरुषाः स्त्रीत्वं नु वाञ्छन्ति यत्
किं चित्रं चलचेतसां मृगदृशां सा नाम धैर्यच्युतिः ॥६८॥

चेतसि त्वञ्च तवाभिसारसमये घोरान्धकारे नदन्-
मेघे साशनिशुष्मणि[1] ध्वनिपरैः सर्वैर्वृते वर्त्मनि ।
जारत्कारव-जैमिनी मुहुरहं भीता स्मरन्ती परं
वंशीनादसहायिनी प्रतिवनं भ्रान्त्या कदा नाभ्रमम् ॥७०॥

पूर्वं भूरिभरावतारणपरः प्राणप्रिय प्रायशः
कंसादीनसुरान् कृतागस इति त्वं तानहन् सज्जनैः ।
निर्दोषोऽत्र परत्र चासि गदितः सत्यं पुनः साम्प्रतं
योषा निष्कलुषा विनाशयसि नोऽपाराय पापाय किम् ॥७१॥

पातिव्रात्यमलौकिकं व्रजपतेः सौभाग्यमत्यद्भुतं
कर्तृत्वं व्रजराजसंपदि परं सौशील्यमस्या[2]स्तथा ।
देवार्चापसदादरादिदिति(?)यशो[3]दाया यशःसम्पदा-
दित्थं याभिरभानि ताभिरधुना यद्‌ भण्यते तच्छृणु ॥७२॥

बन्ध्येयं विहिता न केवलसुतानुत्पत्तितापा पुनः
कर्कश्या धृतगर्भया समदशा[4] कृष्णं विधार्योदरे ।
एषा सापदपारसागरगता धात्रा[5] व्यधायि ध्रुवं
लोके कैर्विधिमानसस्थितकृतिर्ज्ञेया फलैर्ज्ञायते ॥७३॥

प्रस्थाने भवदीक्षणे क्षणगलद्बाष्पाकुलं व्याकुलं
गोपीनां कुलमानुकूल्यकुशलैर्दूतोदितैः सान्त्वितम् ।
एष्यामीति सरस्वतीयमसृषा न स्यात् किमीशस्य ते
प्राणेशागमनन्तु भावि सुहृदामर्थाय नार्थाय नः ॥७४॥

प्रश्ने त्वद्विषये विशिष्य मधुरं कृत्वोत्तरं कैतवं
ज्योतिर्विद्भिरभीतिभिः परिकृतं धर्माधनं(?) का क्षतिः ।
निःस्वानामधुना मनागपि धनाकाङ्क्षास्ति नास्मादृशां
यत् प्राणाः शमनायनायनपरा यास्यन्ति किं श्वोऽद्य वा ॥७५॥

1. MS. त्तषनि। 2. MS. मस्य। 3. MS. यसो। 4. MS. दसा।
5. MS. धात्त्रा।

त्वं मात्रापि मनागपि क्षणमपि प्रेम्णापि दाम्ना मित-
स्तेनाद्यापि गुणेन तेन जननीदास्योऽपि बद्धा वयम् ।
भूयो नाथ न मोचिता यदि कथं निर्वेदशाली वशी
संसारे यमदाममोचनकृते त्वत्पादमाकाङ्क्षति ॥७६॥

अन्योऽद्य श्रमजामिलेन कलिते नारायणे पापिना
याम त्वामविराममाप सुतरां नास्यापदेतत्कृतम् ।
त्वन्नामैकपरायणा यदि वयं यामो न यामालयं
तद्गर्गोक्तिसृतं जनोऽद्य मनुते नारायणस्त्वं गुणैः ॥७७॥

क्लेशं कालियतो विलोक्य भवतः पातुं सहालाहलं
कीलालं वयमुद्यताः[1] प्रिय तदेत्युक्तं यदालीः प्रति ।
यूयं प्राणसमाः प्रिया इयमियं प्राणाधिका राधिका
कापट्यं प्रकटीकृतं तदधुना प्राप्तं पुनः स्पष्टताम् ॥७८॥

स्वप्नेऽन्यप्रमदागताद्वि[2]रहिता त्वत्तो यदा प्रारुदं
किं किं सुभ्रु वदाथ तच्छ्रु तवतेत्युक्तं प्रिये श्रूयताम् ।
यावद् दृक्पथगासि तावदपरास्वीकार आस्तां पुनः
स्वीयं कायमपि स्मरामि न परं मन्येऽद्य तत् कैतवम् ॥७९॥

पौनःपुन्यपतिप्रकाशित(प्रकल्पित ?)परीक्षा सा सरोषा सती
सीता दाशरथिं विहाय विगतप्रेमन् पतिं तादृशम् ।
क्षौणीगर्तमिता तथापि न परा नारी पुनः स्वीकृता
नो तेन प्रतिपादिता प्रतिमखं किं कानकी जानकी ॥८०॥

प्राणाः पात्रमतोऽधिकस्त्वमिति चेद्विश्वस्य हन्त त्वयि
स्थाप्यं स्थापितमाशु रत्नमतुलं यत् प्रेमनाम त्वया ।
विश्वासैकविघातिना पुनरहो नास्मासु संन्यस्य तद्
हे प्राणाधिक साधु तं(?) पुरि कथं ताभ्यः प्रियाभ्योऽपि तम् ॥८१॥

प्रेम प्रेमवतोऽपि यद्व्रजवधूवृन्दस्य किं दृश्यते
नो पत्यौ[3] न सुते[4] न बन्धुषु निजे कायेऽपि तत् कुत्र किम् ।
अस्पष्टं परपूरुषे सुररिपौ संस्थाप्य न प्राप्य य-
च्छोकात् कार्श्यमनेन लब्धमिति कैः संतर्क्य नो कीर्त्यते ॥८२॥

1. MS. तां। 2. MS. त्वि। 3. MS. पात्या। 4. MS. सृते। -

यद्याजन्म सुयत्नतो जगति को राज्यं तत्र जन् स्याद यतो
तल्लक्षेषु महत्सु को यदि [ज] येत, षड्देहगेहानरीन्।
तत्कोटिष्वपि कोऽर्ज्जयेद्यदि तदा तत् प्रेम देवेऽर्पयेद्-
ब्रह्मानन्दकृते मया त्वयि गवां पालेऽर्पितं सत्यवे ॥८३॥
तप्तस्त्वद्विरहेण चन्दनजलैः संसिक्त-शुष्कोऽप्यलं
श्वेतो जातजटो व्रजेऽपि च जटाजूटि[1]भ्रमान्माधव।
किंवा त्वन्मतवर्तिनाऽनवरतं मारेण मादृग् जनो
वैरीव प्रतिबाध्यते बत शवै[2]स्तुलयो न किं बुध्यते ॥८४॥
का निन्दन्ति रुदन्ति का हिमजलैः सिञ्चन्ति पाथोजिनी-
पत्रैः का मृदु वीजयन्त्यपि पराः कुर्वन्ति यातागतम्।
काश्चित् क्वापि वदन्ति गोकुलवधूवृन्दं मृतं काश्च नो
नासान्यस्तकराश्च संशयपरा [:] क्षिपन्ति हाहारवम् ॥८५॥
यल्लाभाय कृतोद्यमा निरुपमा वामा हि रासोत्सवे
रुद्धा बन्धुजनैः[3] क्षणेन मृदुलप्राणास्त्वस्तु [न]त्यजन्।
हा तत्प्रेमवियोगतोऽपि न विपत् प्राणान् यदाप्नोति न[:]
प्राणानां निरणायि नाथ न हि कैः काठिन्यमत्यद्भुतम् ॥८६॥
क्षीणा नस्तनवः परासव[4] इव प्राणास्तु शलप्रभाः
कण्ठाग्रं चलिताश्च सम्नलगिता गच्छन्ति नाद्यापि यत्।
हेतुस्तस्य विमृश्य तद्व्यवसितः प्राणेश्वरस्त्वं तत-
स्तद्यानेऽनुमति[ं] द्रुतं प्रतनु तत् प्रेम्णैव पान्थोप्रतत् ॥८७॥
दण्डं धारयतोऽन्तकस्य चिकुरेष्वाकर्षतोप्यन्तिके
या त्वत्सङ्गमसूचिनी दयित नो दृष्टेव सा शाङ्करी।
लग्ने लग्नकतां गता परिचिता नापि स्वयं साम्प्रतं
प्राणाधानकरी कदर्थनविधावेवं परं मन्महे ॥८८॥
प्राणा नः पतितः परेतपतिना···स्यहे पातिताः
प्रासाशाद्वयलग्नका असुकृतः स्वीयैकवार्तापि सा(?)।
अत्यागं स्वहितं सदा प्रकुरुतेऽन्योन्यं न किं बुध्यते
नास्माकन्तु कदापि पान्थ भविता त्राणं त्वयेतुरच्यताम् ॥८९॥

---

1. MS. ज्वटि। 2. MS शरै। 3. MS. जनै। 4. MS. नव।

सर्वस्वैः परिपोषिताः प्रियतमा ये चासवोऽद्यापि तेऽ-
प्याशाधीनतया कदर्थनमहो किं किं न कुर्वन्ति नः ।
आशा दुःखकरीति का व्रजभुवामाभीरवामभ्रुवां
दासी वा मनुते न वेदसहशं यत् पिङ्गलाशासनम् ॥८०॥
पूर्वं या प्रहिता प्रयाणसमये दूतोदितेन स्थिता
प्राणाधानविधायिनी मुररिपो साशा सुनिःसार्यताम् ।
प्राणाश्च चयमाप्नुवन्तु भवतादस्माकमव्याहतिः[1]
पान्थेति त्वरया त्वया पुरवधूक्रीडाभृगो गम्यताम् ॥८१॥
सर्पेण(?)दमनं दवाग्निशमनं गोवर्धनोद्धारणं
गोष्ठेऽरिष्टविमर्दनं शिशुगणत्राणन्त्वघध्वंसनम् ।
इत्येवं व्रजजीवनावनकृते सम्पादितं यत्त्वया
किं नास्माभिरवेदि[2] कर्कवनितावाधाविधौ केवलम् ॥८२॥
आयासेन विना शरीरविहृतिः सश्रेयसां श्रेयसी
या लोकश्रुतिरस्ति तद्विहितये ये कालकल्पा हताः ।
त्वत्तो यद्यपि हन्त दैत्यजनुषां तेषाञ्च न स्याद्विप-
न्ना[3]स्माकन्तु तदा प्रपीडनमिदं प्राणप्रयोज्यं भवेत् ॥८३॥
इष्टो घोरतरत्वदीयविरहोत्तापक्षयैकक्षमो
गङ्गासागरसङ्गमे मम पुनः कायव्ययः कामदः ।
स स्यादिष्टतमः सुखाय सुतरां तमात्मनां मादृशां
नो तापाय कदापि पान्थ मथरानाथस्त्वया कथ्यताम् ॥८४॥
मैधे नस्त्यज किं च तं व्रज पुरा कृत्वा प्रतिज्ञां पुरा-
दैष्यामीति हरिः पुरीपरिसरे विस्मृत्य यः सुस्थितः ।
तं[4] त्यक्त्वा सखि विस्मृतिं करुणयाऽस्मानेहि तेनाशु[5] नः
श्रीकृष्णे स्मरणीयकर्मणि दुराशा सा क्षयं प्राप्नुयात् ॥८५॥
गोस्त्रीघाति-कृतघ्नतेति च पुनर्विश्वासनाशादिति
प्राधान्यात् प्रवदन्ति केचन चतुर्दोषं भवन्तं प्रिय ।
चेन्नारायणता भवेत्तव तदा सत्यादयो ये गुणा-
स्ते न स्यु[:]कथमित्यतः क्षितितले नातर्किकै[6]स्तार्किकैः ॥८६॥

1. MS. हितं । 2. MS. वेद । 3. MS. ना । 4. MS. तत् ।
5. MS. स्यानेहि तेनास्त । 6. MS. नातर्ककै ।

सत्यं पालयितुं जगत्त्रयमदाद्दे रोचनिर्विंशावे
त्यक्त्वा दुस्त्यजमात्मजं दशरथो राजाऽत्यजज्जीवितम् ।
ऐश्वर्यातिशयेऽपि शान्तनुसुतः सीमन्तिनीं नाग्रही-
दङ्गीकृत्य पुरा पुराधिपतयाऽप्येतत्त्वया लोपितम् ॥८७॥

न द्रक्ष्यामि पुनर्हरे तव मुखं काये न गन्धार्पणं
कण्ठे माल्यसमर्पणं न च करिष्यामीति खिन्नं मनः ।
पौनःपुन्यमथो मया कठिनया संसान्त्व्यमानं च तत्
स्वल्पोऽयं समयोऽपि कल्पसम इत्येवं सदा मन्यते ॥८८॥

अत्यस्मासु पुराङ्गनासु हृतचेत्स्वासक्तिनाशो विना
प्रत्यस्तोसि तदा वदेस्त्वमिति तं नासां प्रभुत्वं भवेत् ।
गङ्गासागरसङ्गमस्य विभुताभङ्गे पुनः सङ्गम
गोपीभिर्भवतो भवन्तविजयत्येवं न जानीहि किम्(?) ॥८९॥

क्वाधैर्यं क्व कुलाङ्गना कथमपि ग्राह्यः सखीति प्रिया(?)
निन्दाव्याहतये ममास्तु चरितं वाङ्माधुरी साधु वा ।
निन्दंत्येव कुलस्त्रियः स न पुनर्लभ्योऽपि जन्मान्तरे
चाञ्चल्यं हि मनः सुकृतिमा(?)का तन्मुखं पश्यति ॥१००॥

सारासारविचारधीरकरुणाधीनाध्वनीन त्वमि-
त्यस्माकं वचनेन सस्मित इवैकान्ते नितान्ते सुखम् ।
आसीनं तमनन्यचेतसमलं विज्ञाय विज्ञापये-
र्निर्दोषञ्च विदूषयन्ति हि वचो लब्धेऽन्तरे दुर्धियः ॥१०१॥

धातः सकातरमिदं प्रणिपत्य याचे
द्वेषं करोतु करुणामथवा तनोतु ।
गोपाल एष पशुपालकपालबाल[:]
प्राणेश्वरो भवभवेऽपि ममैव भूयात् ॥१०२॥

मालाकृतेव कुसुमोत्थमिवाच्चमेण
प्रेम्णा गुणेन च मया ग्रथितं हि हारम् ।
राधोत्थितप्रमदसार [परं] पवित्रं
कुर्वन्ति के सहृदया हृदये न मोदात् ॥१०३॥

....
....
....
.... ॥१०४॥

श्रीसीतापतिसेवकेन टिकरीवासेन काव्यं मुदा
भोलानाथधरामरेण रचितं यत् पान्थदूताह्वयम् ।
राधाकृष्णपदारविन्दविगलन्मध्वादराः सादराः
सन्तस्तत् परिशीलयन्तु सततं सन्तोषसंप्राप्तये ॥१०५॥

[समाप्तमिदं काव्यम्]